जाड्यं बलं सैन्यमङ्गं देहो जलं द्युतिः। शुक्लता मण्डले सत्वं गौरवं मानशालिता। निग्रहानुग्रहविभूराजचिह्नादिलाञ्छनम्। माहात्म्यं मन्त्रगाम्भीर्य्यं द्युतिर्बुद्ध्यादिशालिता। सामर्थ्यं देहजा शक्तिः शौर्य्यं तेजो विनिर्दिशे। आशेच्छोक्ता मतिर्धर्मे श्रद्धा, बन्धः पराश्रयः। पानीयपतनं वृष्टिर्जलेऽवगाह्य मज्जनम्। आधिव्याधी तापमान्द्ये सपिण्डा बान्धवः स्मृताः। सत्यान्वृतं वणिग्वृत्तिराधानं प्रसवः स्मृतः। दासत्वं परकर्म्मोक्तमन्यत् स्पष्टं स्वनामतः। निरूप्याणि यथायोगं कुलजातिस्वरूपतः। शुभयोगेक्षणात् सौख्यं पत्युर्वीर्य्यानुसारतः। दारिद्र्यदुर्गतिमान्द्यारिकलिदूना विपर्य्ययः। प्रश्नकालेऽपि सकलं विचार्य्यं प्रष्टुरिच्छया। सर्वेषामुपयोगोऽत्र चित्रं यच्छन्ति सज्जनाः"।

**सहमरण** न० सह मृतेन पत्या सह एकचितारोहणेन मरणम्। मृतपतिचितारोहणेन तत्सहितमरणे शु०त० "अङ्गिराः "मृते भर्त्तरि या नारी समारोहेद्धुताशनम्। साऽरुन्धतीसमाचारा स्वर्गलोके महीयते। तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे। तावन्त्यब्दानि सा स्वर्गे भर्त्तारं याऽनुगच्छति। व्यालग्राही यथाव्यालं बलादुद्धरते बिलात्। तद्वद्भर्त्तारमादाय तेनैव सह मोदते। मातृकं पैतृकञ्चैव यत्र कन्या प्रदीयते। पुनाति त्रिकुलं नारी भर्त्तारं याऽनुगच्छति। तत्र सा भर्तृपरमा परा परमलालसा। क्रीड़ते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश"। "ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यो नरः। तं पुनाति च सा नारी इत्याङ्गिरसभाषितम्। साध्वीनामेव नारीणामग्निप्रपतनादृते। नान्यो धर्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्" "या नारीत्युपदानात् सहमरणाभावपक्षोऽपि सूचितः नान्यो धर्म इति तु सहमरणस्तुत्यर्थम्। तथाच विष्णुः "मृते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा" इति। ब्रह्मचर्य्यं मैथुनवर्जनं ताम्बूलादिवर्जनञ्च यथा प्रचेताः "ताम्बूलाभ्यञ्जनञ्चैव कांस्यपात्रे च भोजनम्। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्" स्मृतिः "एकाहारः सदा कार्य्यो न द्वितीयः कदाचन। पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्। गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तथा पुनः। तर्पणं प्रत्यहं कार्य्यं भर्तुस्तिलकुशोदकैः"। एतच्च तर्पणं पुत्रपौत्राद्यभावविषयमिति मदनपारिजातः। "वैशाखे कार्त्तिके माघे विशेषनियमञ्चरेत्। स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः"। तत्र साध्वीमाह हारीतः। "आर्त्तार्त्ते मुदिता हृष्टे प्रोषिता मलिना कृशा। मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता" इति छन्दोगपरिशिष्टीयमिति कल्पतरुः। साध्वीप्रसादेन लोकधारणमप्याह मत्स्यपु० "तस्मात् साध्व्यः स्त्रियः पूज्याः सततं देववज्जनैः। तासां राज्ञा प्रसादेन धार्य्यते च जगत्त्रयम्"। महाभारते "अवमत्य च याः पूर्वं पतिं दुष्टेन चेतसा। वर्त्तन्ते याश्च सततं भर्त्तॄणां प्रतिकूलतः। भर्त्रनुमरणं काले याः कुर्वन्ति तथाविधाः। कामात् क्रोधात् भयात् मोहात् सर्वाः पूता भवन्ति ताः"। अत्र चैहिकब्रह्मघ्नपतिद्रोहनिषेधात् जन्मान्तरीणतत्पापवत एव सहमरणेनोद्धारः" शु०त०। ब्रह्मपु० "देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयम्। निधायोरसि संशुद्धा प्रविशेज्जातवेदसम्। ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी। त्र्यहाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शास्त्रवत्"। ऋग्वेदवादात् "इमा नारीरविधवाः" इत्यादिमन्त्रात्। वृहन्नारदीये "बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा। रजस्वला राजसुते! नारोहन्ति चितां शुभे!"। राजसुते! इति सगरमातुः सम्बोधनम्। वृहस्पतिः "बालसम्वर्द्धनं त्यक्त्वा बालापत्या न गच्छति। रजस्वला सूतिका च रक्षेद्गर्भञ्च गर्भिणी। एवमन्यतश्चेद् बालसम्वर्द्धनं स्यात्तदा तस्या अप्यधिकारः। व्यासः "दिनैकगम्यदेशस्था साध्वी चेत् कृतनिश्चया। न दहेत् स्वामिनं तस्या यावदागमनं भवेत्। भविष्यपुराणे "तृतीयेऽह्नि उदक्याया मृते भर्त्तरि वै द्विजाः। तस्यानुमरणार्थाय स्थापयेदेकरात्रकम्"। तस्य भर्त्तुः। तथा "एकां चितां समासाद्य भर्त्तारं यानुगच्छति। तद्भर्त्तुर्यः क्रियाकर्त्ता स तस्याश्च क्रियाञ्चरेत्। एतच्च पिण्डदानम्"। "एवञ्च अङ्गिरोब्रह्मपुराणवचनालोचनया ब्राह्मण्यादिसकलभार्य्याणां स्वगतभर्तृगतफलविशेषार्थिनीनां गर्भवतीबालाऽपत्यादिव्यतिरिक्तानां सहमरणानुमरणयोरधिकारः न चात्र योगसिद्धकरणविरोधान्न समुच्चितफलसिद्धिरिति वाच्यम्। योगसिद्ध्यधिकरणे हि "यः पुत्रकामो यः पशुकाम" इत्यादिना यज्ञक्रतूनुपक्रम्य "एकस्मै वा कामायान्ये यज्ञक्रतव आह्रियन्ते सर्वेभ्यो दर्शपौर्णमासौ" इत्युक्तं तत्र तत्सिद्धि-